International Journal of Sanskrit Research 2018; 4(1): 133-134

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(1): 133-134
© 2018 IJSR
www.anantaajournal.com
Received: 22-11-2017
Accepted: 26-12-2017

डा0 त्रिभुबननारायण मिश्र
भीड़हा, समस्तीपुर, बिहार, भारत

**Corresponding Author:**
डा0 त्रिभुबननारायण मिश्र
भीड़हा, समस्तीपुर, बिहार, भारत

# मुरारेः साहित्यिकी दार्शनिकी च वैदूष्यम्

**डा0 त्रिभुबननारायण मिश्र**

**प्रस्तावना**

परवर्तिनः प्रायः सर्वे साहित्यकारा अस्माद्ररत्न राशेर्भाव भाषाकल्पनानाममूल्यानि रत्नानि गृहीत्वा स्वकल्पनामलंकृतां काव्यसम्पदं च श्रीसमृद्धिसम्पन्नां कृतवन्तः सन्ति। महाकवेरयं साहित्यनिधिस्तदनुवर्त्तिनां संस्कृतस्य प्रायः सर्वेषां कविनाटककाराणां कृते उपजीव्यमेवाभूदिति सर्वे जानन्ति सुधियः। तद्यथा–

'मुरारिपदचिन्ता चेत्तदा माघे रतिङ्कुरु।
मुरारिपदचिन्ता चेत्तदा माघे रतिङ्कुरु।।'
'मुरारिपदचिन्तायां भवभूतेस्तु का कथा।
भवभूतिमनादृत्य मुरारिमुररीकुरु।।' [1]

इत्यादिना प्रशंसितपाण्डित्यस्य मुरारेः कः काल इति विचारे प्रस्तुते–

भवभूतेः पद्यद्वयस्योद्धरणात्तत्तोर्वाचीनी मुरारिः काश्मीरनृपस्या – वन्तिवर्मणः (855–884) काले वर्तमानः तत्कृपोपजीवी च हरविजयकर्त्ता रत्नाकरः–

'अङ्कोत्थनाटक इवोत्तमनायकस्य नाशं कविर्व्यधित यस्य मुरारिरित्थम्' इत्यादिना मुरारिं स्मृतवानिति ततोयं प्राचीनः। 1135 खष्टाब्दे वर्त्तमानो थ श्रीकण्ठचरितरचयिता मङ्खः मुरारिं राजशेखरात् प्राचीनं मन्यते। इदं सर्वं विचार्य खोष्टनवमशतकपूर्वार्द्धे मुरारिरजायतेति प्रतीयते।

रामायणकाले कथं बहवो काठका दण्डमाणवास्तथा च लोकायतिका समाजे व्याप्ता वर्धन्ते स्म चेति। समाजे ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राश्चाण्डालाः किरातादये वा कथं व्यवहरन्ति स्म इति वाल्मीकिना सूक्ष्मेक्षिकया अदर्शि। कृत्स्नं रूपकचक्रमिदं तावदेकस्यैव कर्तुः कृतिरित्यत्र प्रायः सर्वेषां विदुषामैकमत्यमालोक्यते। वक्ष्यमाणाभिर्वायोयुक्तिभिश्च एककर्तृकत्वमिदं साध्यते। तद्यथा–

संस्कृते रूपकान्तरेशु प्रायः सर्वत्र 'नान्द्यन्ते' इति श्लोका नन्तरमेव।

रूपकान्तरेषु यत्र ''प्रस्तावना'–शब्दप्रयोगो दृश्यते, तत्र, रूपकेषु एषु 'स्थापना' शब्दः प्रयुज्यते। रूपकान्रेषु च रूपकानाम्– कविनामसंसूचनार्थं या 'प्ररोचना' पठयते, तस्या अत्र सर्वथाऽभावो दृश्यते। न्यूनातिन्यूनं चतर्षु रूपकेषु नान्द्यां 'मुद्रालौर–बलेन प्रदर्शितानि तत्तत्प्रधानपात्राणां नामधेयान्यधीयन्ते।

वक्ष्यमाणाभिश्च रीतिभीः रूपकाणि इमानि मिथः सम्बद्धानि आसाद्यन्ते–

यथा भवभूतिकृतम् उत्तररामचरितं तदीयं महावीरचरितम्, तथा इह स्वप्नवासवदत्तं प्रतिज्ञायौगन्धरायणम्, उत्तरार्द्धतया अन्वेति। अनयोद्वयोस्तान्येव पात्राणि, सैव शब्दप्रयोगपरिपाटी शैली, चरित्र चित्रणं च इति बहुशः सादृश्य पश्यामः। अन्यच्च, स्वप्नवासवदत्ते कति चित् प्रतिज्ञायौगन्धरायणीया उल्लेखा अपि लभ्यन्ते।

महाकविः कालिदासः सरस्वत्या वरदपुत्रः सुरभारत्याश्च शाश्वतश्रृंगारोऽस्ति। तस्य साहित्यमेकस्तादृशोऽनुपमरत्नराशिरस्ति यस्मिन्ननेकानि दीप्तरत्नानि चिरादेव समुद्भासन्ते। अनेन रत्नराशिना समस्तभारतीय साहित्या श्रीवृद्धौ यदपूर्वयोगदानं प्रदत्तमस्ति तदपरिमेयमेवास्ति।

मुरारिपाण्डित्यम्–संस्कृतकविषु मुरारेर्महती प्रतिष्ठा विद्यते। भाषाप्रौढिव्याकरणपाटवं चास्य विपश्चितो रञ्जयति। स हि बालवाल्मीकिर्महाकविश्चाख्यायते। तस्य प्रशंसा न केवलमितरैः कृता पि तु स स्वयमप्याह–

'देवी वाचमुपासते हि बहवः सारं तु सारस्वतं
जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः।
अब्धिर्लङ्घित एव वानरभटैः किन्त्वस्य गम्भीरता–
मापातालनिमग्नपीवरतनुर्जानाति मन्थाचलः।।[2]

अस्य रचनायामतिशयोक्तेः प्राचुर्यं दृश्यते। असत्यामपि उपमाचमत्कृतौ सत्यामपि क्लिष्टतायां बन्धदार्ढ्येन सीतकृतमाधुर्येण चास्य कवित्वं रमणीयशैलीसम्पन्नं मन्वते।

मुरारेरनर्घराघवम्–मुरारेरेकमेव नाटकं यत् कथया भवभूतेर्महावीरचरितमनुकरोति। यदि भवभूतेः कविता सरला मनोहरा च कथ्यते तदा स्य कविता प्रौढा सा लौरा

झङ्कारशालिनी च कथ्यताम्।

मुरारेः कवितायाः कठिनता तद्रसानुभवपरिपन्थिनीति सत्यं भवितुमर्हति, परन्तु तस्यां श्रूयमाणायां सत्यामेव को२पि हर्षमिश्रो२वधानसम्मुखीभावः प्रादुर्भवति। दृश्यताम्–

'क्रियाणां रक्षायै दशरथमुपस्थाय विमुखे
मुनौ विश्वामित्रो भगवति गते सम्प्रति गृहान्।
तपोलेशक्लेशादुपशमितविघ्नप्रतिभये,
प्रवृत्ते वा यष्टुं रघुकुलकथैवास्तमयते।।' [3]

कीदृशी प्रसन्नता, कीदृशं च वाक्यपाटवम् ! रामे वनवासप्रस्थानकाले गत्रं तरति सति कविनोक्तम्–

तीर्त्वा भूतेशमौलिस्रजममरधुनीमात्मना२सौ तृतीय–
स्तस्मै सौमित्रिमैत्रीमयमुपहृतवानातरं नाविकाय।
व्यामग्राह्यस्तनीभिः शबरयुवतिभिः कौतुकोद×चदक्षं
कृच्छ्रादन्वीयमानः क्षणमचलमथो दक्षिणेन प्रतस्थे।।' [4]

अस्य कवेर्गाढबन्धता पाश्चात्येभ्यो न रोचते, बिल्सनमहोदयो२स्य कवितायाः सम्बन्धे२भिहितवान्–

'साम्प्रतिका हिन्दवो विचारप्रकर्षमनुभूतिमार्दवं कल्पनाकामनीयक×च विभावयितुं मनागिव क्षमाः, अत एव हिन्दुविद्वांसो२न्याय्यं गौरवं मुरारये प्रदत्तवन्तः। ये पुनरिदमीयमनर्घराघवमधीयते ते मुरारेः प्रशंसामुचितामेव मन्यते। अनर्घराघवस्य प्रस्तावनातो२स्य जननीजनकयोर्नामनी 'वर्धमानतन्तुमती' इति ज्ञायेते। एव×च संस्कृतसाहित्ये मुरारेः स्थानमत्रा प्रस्तुतोऽस्ति।

**सन्दर्भाः**

1. संस्कृत साहित्यइतिहासः, पृ. सं.–128 ।
2. तत्रौव, पृ.–124 ।
3. तत्रौव, पृ. –129।
4. तत्रौव ।